Shri Raghunatha Temple MSS. Library,
JAMMU

५.११०

No. ५२-ख

Title मध्यकौमुदी (समासप्रकरण)

Author

Extent २३ पत्र Age

Subject व्याकरण

© Dharmarth Trust. Digitized By eGangotri

नं० ५१-२८
मध्यकौमुदी
समासाश्रयविधिः
23 पत्राणी

मध्यकौमुदी समासः श्लो ३०८ प.२३

नं ५१



© Dharmarth Trust. Digitized By eGangotri

तत्कृते इति लुप्त तृतीयाकम् ।

लुप्त तृतीयाकमिति । सोगत्वादिति शेषः । एवंच तत्कृ
देन तृतीयान्तपरामर्शसम्भवेऽपि अगतदन्तार्थो
लक्ष्यते तस्य च गुणवचने नेत्यनेनान्वयः गुणवचन
स्य च तत्कृतत्वमर्थद्वारा तथाच तृतीयान्तार्थकृतो यो
गुणस्तद्वाचकेन सह समस्यते इत्याशयेन व्याचष्टे
तृतीयांतार्थकृतगुणवचने नेति ॥ =४

ॐ श्री गणेशाय नमः ॥ अथ तत्पुरुषः ॥ तत्पुरुषः २।१।२२ अधिकारोऽयं प्राग्बहुव्रीहेः ॥

द्विगुश्च २।१।२३ द्विगुरपि तत्पुरुषसंज्ञस्स्यात् ॥ द्वितीया श्रितातीतपतितगतात्यस्त

प्राप्तापन्नैः २।१।२४ ॥ द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते ॥ कृष्णं श्रि

तः कृष्णश्रितः दुःखातीतः इत्यादि ॥ तृतीया तत्कृतार्थेन गुणवचनेन २।१।३०

तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा समस्यते ॥ शङ्कुलया ख

ण्डः शङ्कुलाखण्डः ॥ धान्येनार्थो धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः ॥

कर्तृकरणे कृता बहुलम् ॥ २।१।३२ कर्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते ॥

हरिणा त्रातः । हरित्रातः । नखैर्भिन्नः । नखभिन्नः ॥ चतुर्थी तदर्थार्थबलि

हितसुखरक्षितैः ॥ २।१।३६ चतुर्थ्यन्तार्थाय यत्तद्वाचिना सह अर्थादिभिश्च

सह ॥ [continues in margin:] ... इति सूत्रार्थः भिन्नत्वाद्वारैव तयोः सामर्थ्यम् ॥

प्रत्ययग्रहणे तदन्तग्रहणमिति न्यायात्
द्वितीया पदं द्वितीयान्तपरमित्याशयेनाह ।
द्वितीयान्तमिति । अत्र च समासप्रत्ययविधौ
तदन्तविधित्वाभावात् कष्टं परमश्रित इत्या
दौ श्रिताद्यन्तेन न समास इति बोध्यम् ॥ =३

दुःखमतीतः । दुःखातीतः । =
शोकोत्तरणमिति । कूपं पतितः
कूपपतितः । ग्रामं गतः । ग्रामग
तः ॥ तुहिनमत्यस्तः । तुहिना
त्यस्तः । सुखं प्राप्तः । सुखप्राप्तः ।
दुःखमापन्नः । दुःखापन्नः । =४

अक्ष्णोति । न ह्यक्ष्णा
काणत्वं कृतं किन्तु कर्म्मादिनेवेति न त
त्कृतं काणत्वमत्र येनाङ्गविकार इत्यनेन
तृतीया ।

भक्ष्येण मिश्रीकरणम् २।१।३५
गुडेन मिश्रा धानाः । गुडधानाः ।

एवं विशदमभ्यवहार्य्यं भक्ष्यमि
त्युक्तेः कठिनं पिपिकावयवं खा
द्यं यत्तद्भक्ष्यं तद्वाचिना मिश्रीक
रणवाचि तृतीयांतं समस्यते इति सूत्रार्थः भिन्नत्वाद्वारैव तयोः सामर्थ्यम् ॥

© Dharmarth Trust. Digitized By eGangotri

बलिरक्षितग्रहणादिति । हितसुखग्रहणं तु न ज्ञापकं तद्योगे
चतुर्थी वा षष्ठी त्यनेन चतुर्थी विधानात् ताभ्यां तादर्थ्ये चतु
र्थ्या समासः स्यादेवेति बोध्यम् ॥

अर्थशब्दस्य नित्यत्वं तु तेन पदवल्लिं
गमित्यस्य बाधायाह । विशेष्यलिं
गता चेति एतदेवाग्रे विधेयं
न तु नित्यत्वं चतुर्थ्येव तदर्थस्यो
क्तत्वात्तद्प्रयोगः अर्थशब्देन वि
ग्रहप्रसक्तेः ॥ =

बलिरक्षितग्रहणं ज्ञापकात् ।

तुर्थ्यंतं वा समस्यते ॥ यूपाय दारु यूपदारु ॥ तदर्थेन प्रकृतिविकृतिविकारभाव

वे = २ एवेष्यते ॥ तेनेह न । रंधनाय स्थाली । अर्थेन नित्यसमासो विशेष्यलिंगता चेति ।

वक्तव्यम् ॥ द्विजायायं द्विजार्थः सूपः । द्विजायेयं द्विजार्था यवागूः । द्वि

जायेदं द्विजार्थं पयः । भूताय बलिः भूतबलिः । गवे हितं गोहितं । गो

सुखं । गोरक्षितं ॥ पञ्चमी भयेन । २।१।३७ । पंचम्यंतं भयेन वा समस्यते ॥ चौ सह =

राद्भयम् । चोरभयम् ॥ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । २।१।३९ । स्तोकादयः

क्तान्तेन सह समस्यते ॥ पंचम्याः स्तोकादिभ्यः ६।३।२ एभ्यः पंचम्या अलुक्

स्यादुत्तरपदे परतः ॥ स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः । अ

भ्यासादागतः । दूरादागतः । कृच्छ्रादागतः ॥ षष्ठी २।२।८ षष्ठ्यंतं सुबंते

स्तोकेति । अत्र स्तोकार्थोऽल्प
शब्द एव न तु लेशादयो व्या
ख्यानात् ॥

© Dharmarth Trust. Digitized By eGangotri

खंडवाच्यर्धशब्दो न नित्यनपुंसकः ग्रामार्द्धो नगरार्द्ध इति वैषम्यांशे समांश
वाचीतु नित्यनपुंसकः स एवेह गृह्यते पूर्वापरे ति सूत्र एवार्द्धशब्दे पठनी
य अर्द्धमिति योगविभाग निर्देशान्न पुंसकत्वे लब्धे पुनर्नपुंसकग्रहण
दित्याशयेनाह नित्यं क्लीब इति ॥ =५

पिप्पल्या नियतविभक्तिकत्वेनैकविभक्ति चापूर्वनिपात इत्य
नेनोपसर्जनत्वात् ह्रस्वत्वप्राप्तावाह एकविभक्ताविति । =

राजपुरुष इति । राजन् अस् पुरुष सु इत्य
लौकिकविग्रहे समासे कृते सुपो लुक्य
न्तर्वर्तिनी विभक्तिमाश्रित्य पदान्तत्वा
न्नलोपः । =

षष्ठीसमासप्रसंगात् तदपवादमेकदेशिसमास
माह । पूर्वापरे ति । एकदेशोऽवयवे रूढः सतो
मत्वर्थीय इनिः अवयविसत्त्वावयवाकांक्षा
या सुपस्थितत्वात् पूर्वादय एवावयवा इति
बोध्यम् ॥ =१

न सह समस्यते ॥ राज्ञः पुरुषः । राजपुरुषः ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥२।२।१॥ अवयविना सह पूर्वादयः समस्यन्ते ॥ एकत्वसंख्याविशिष्टश्चेदवयवी ॥ षष्ठीसमासापवादः ॥ पूर्वं कायस्य पूर्वकायः । अपरकायः । एकदेशिना किं । पूर्वं नाभेः कायस्य । एकाधिकरणे किं । पूर्वं छात्राणां ॥ अर्द्धं नपुंसकं ॥२।२।२॥ समांशवाच्यर्द्धशब्दो नित्यं क्लीबे स प्राग्वत् ॥ अर्द्धं पिप्पल्याः । अर्द्धपिप्पली ॥ कालाः परिमाणिना ॥२।२।५॥ परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते ॥ मासो जातस्य यस्य स मासजातः ॥ सप्तमी शौण्डैः ॥२।१।४०॥ सप्तम्यन्तं शौण्डादिभिः प्राग्वत्वा ॥ अक्षेषु शौण्डः । अक्षशौण्डः । शौण्ड । धूर्त । कितव । व्याड ।

२ कौ.

२ यद्यपि अन्याराद्
ति सूत्रे दिक्शब्द
इति व्याख्यानेन अदिगवृत्तिनापि
योगे पञ्चमी स्वीकृता इति षष्ठी
दुर्लभा तथापि तस्य परमात्र
हितमिति लिंगादवयवाच्चियो
गे पंचमीन । =३

एकविभक्तावषष्ठ्यंतवचनं ।
इत्युपसर्जनसंज्ञाभावात् ह्रस्वोन ।
इति मूलं ॥ =६

इदं च सूत्रं जातस्य मास इति विग्रहे
जातमास इत्यनिष्टप्रयोगनिवा
रणार्थं बहुव्रीहिणा गतार्थता तु
न शंक्या मासो जातोऽस्येत्यादितो
मासस्यैव जननप्रतीतेर्नत्वन्यपदार्थस्य ॥

अधिकरणं द्रव्यमेकत्वविशि
ष्टद्रव्यवर्त्तमानेनावयवा
विनेति वाक्यार्थः फलितम
दाहैकत्वेति । ॥ =२

पूर्वं नाभेः कायस्येति नाभेर्यः
पूर्वभागः स कायस्यावयव इत्य
र्थे सति नाभेरवयवित्वाभा
वात् पूर्वशब्दयोगे षष्ठी
तथा चात्र पूर्वस्य भागस्य नाभि
रवधिर्न त्वेकदेशीति नो ना
भ्या न समास इति भावः । =४

सप्तमीति अधिकरणकारकस्य कर्तृकर्म
द्वारा क्रियान्वया शौण्डादिभिः सामर्थ्यम
क्रियाचात्र सक्तिरन्यावेत्यागनाग्रहः । =२

कालाइति । बहुवचनात् कालवाचकाः । परिमाणिना सम
तेपरिच्छिद्यते येन तत्त्वे...
स्तदाह परिच्छेद्यवाचिनेति ...
स्यते न तु परिमाणी काले ... मासजातो ... जननक्षण
दकर्तृक्रियाद्वारेव मासजातो ... पुरुष मध्यपरिच्छिन्ने
कालान्तरालभावी मासादि जीता ... मासजातः शाव
... ति तेन द्व्यहादिजातेन ... व्यवहारः ॥ =३

© Dharmarth Trust. Digitized By eGangotri

प्रवीण । संवीत । तराधिपति । पटु । पंडित । कुशल । चपल । निपुण
नि । द्वितीयातृतीया इत्यादियोगविभागादन्यत्रापि द्वितीयादीनां प्र
योगवशात्समासो ज्ञेयः ॥ दिक्संख्ये संज्ञायाम् ।२।१।५०। विशे
षणं विशेष्येण बहुलमित्येव सिद्धे संज्ञायामेवेति नियमार्थं सूत्रं ॥
पूर्वेषुकामशमी । सप्तर्षयः । तेनेह न । उत्तरा वृक्षाः । पंच ब्राह्मणाः ॥
तद्धितार्थोत्तरपदसमाहारे च ।२।१।५१। तद्धितार्थविषये उत्तरपदे च
परतः समाहारे च वाच्ये दिक्संख्ये वा समस्येते ॥ पूर्वस्यां शालायां भ
वः । पूर्वा शाला इति समासे जाते । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । इति
पूर्वपुंवद्भावः ॥ दिक्पूर्वपदादसंज्ञायां ञः ।४।२।१०७। अस्माद्भवाद्य
र्थे ञः स्यादसंज्ञायां ॥ तद्धितेष्वचामादेः ।७।२।११७ ॥ ञिति णिति च तत

तद्धितार्थोत्तरेत्यादिसूत्रे वैषयिके ।
आधारे सप्तमी । विषयत्वं चानेक
विधमित्याहुः ॥ तद्धितार्थविषये इ
त्यादि तद्धितार्थवाच्ये इति तु नोक्तं
पाञ्चनापितिरित्यादौ समासेनोक्त
त्वात्तदुत्तरं तद्धितानुत्पत्तिप्रसंगात्
। अत एव द्विगोस्तद्धितस्य लुगवच
नं चरितार्थमन्यथा तदर्थस्य समा
सेनोक्ततयाऽप्रयोगात् तदनुत्प
त्तौ कथं लोपः स्यात् ॥ =

नियमार्थमिति विशेषणं विशेष्ये
णेत्यनेन सिद्धे तत्पुरुषे संज्ञायामेव
दिक्संख्ये समस्येते नान्यत्रेति नियाम
कमिदमिति भावः । त्रिलोकनाथ
इत्यादौ तु उत्तरपदद्विगुरिति असंज्ञ
कत्वेऽपि न क्षतिः । पूर्वसूत्र इत्या
दौ संज्ञाभावेऽपि कालवाचकत्वात्
समासो न त्वनेन दिग्विशेषबोध
उदय इत्यादि सम्बन्धीया एव दिक्
त्वात् एवं देशवाचकेनापि समास
इति द्रष्टव्यम् ॥ =४

यद्यपि स्त्रियाः पुंवदित्यनेनापि प्रकृतरूपसिद्धिस्तथापि उत्तरपूर्वा इत्या
द्यर्थं सर्वनाम्न इति वचनमावश्यकं वृत्तिपदोक्तत्वादिहापि तदुपन्यासो
न्याय्य इति भावः । तद्धितवृत्तौ समासवृत्तौ चेति कैयटः ॥ =३

© Dharmarth Trust. Digitized By eGangotri

तद्धितार्थेत्यत्रोक्त इति अयं भावः । पूर्वसूत्रविषये एवेयं संज्ञा एतदर्थमेव सूत्रद्वयं कृतम् अन्यथा द्विकसंख्यासंज्ञायाम् अतद्धितार्थोत्तरपदसमाहारे ऽपि स्यादिति ब्रूयात् । तेन सप्तर्षय इत्यत्र इगन्तकपाले (?) त्यादिना पूर्वपदप्रकृतिस्वरत्वं न भवति किन्तु समासान्तोदात्तत्वम् । एवञ्च संख्यापूर्वस्त्रिविधः तद्धितार्थविषये उत्तरपदे च परतः समाहारे वाच्ये चेति तत्र संख्यापूर्वोयः समासः स द्विगुरित्यर्थः तद्धितार्थे यथा पञ्चकपालः संस्कृतं भक्षा इत्यण् । द्विगोर्लुगनपत्ये इति लुक् । उत्तरपदे यथा पञ्चनावप्रियः नावो द्विगोरिति समासान्तष्टच् । समाहारे पञ्चमूली द्विगोरिति ङीप् ॥ =१०

उदात्त इति अवान्तरतत्पुरुषे पूर्वपदे प्रकृतिस्वरेण पूर्वशब्दस्याद्युदात्तत्वमेव स्यादिति भावः ॥ =३

द्धिते च चामादेरचोऽद्धिः स्यात् ॥ यस्येति च ॥ पौर्वशालः । पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः । तेन शालाशब्दे आकार उदात्तः ॥ पूर्वशालाप्रियः । द्विगुसमाहारे नास्ति । अनभिधानात् । संख्यायास्तद्धितार्थे । षण्णां मातॄणामपत्यं षाण्मातुरः ॥ मातुरुत्संख्यासंभद्रपूर्वायाः । ४।१।११५ । संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यात् अण्प्रत्ययश्च । इति वक्ष्यमाणसूत्रेणाऽण् ॥ पञ्चगावो धनं यस्येति त्रिपदे बहुव्रीहौ अवान्तरतत्पुरुषस्य विकल्पे प्राप्ते ॥ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ॥ गोरतद्धितलुकि । ५।४।९२ गोऽन्तात् तत्पुरुषाट्टच् स्यात् । समासान्तो न तु तद्धितलुकि ॥ पञ्चगवधनः ॥ संख्यापूर्वो द्विगुः ॥ २।१।५२। तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्वि

को॰
२
3

एतच्चो भयत्रापि नित्यता बोधकमिति बोध्यम् । अत एवैतद्वार्त्तिकमुक्त्वा समुदायवृत्तावयवानां कदाचिदप्यवृत्तिर्मा भूदिति प्रयोजनमुक्तं भाष्ये ॥ =८

विकल्पे प्राप्ते इति महाविभाषयेति शेषः । ततश्च टजभावे पञ्चगोधन इत्यपि स्यादिति भावः । =६

गोऽन्तस्य तत्पुरुषस्य समासान्तष्टच् स्यादिति सूत्रार्थस्तत्फलितमाह । गोऽन्तादिति । अतद्धितलुकीति किं पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यत्र तद्धितठकोऽध्यर्द्धपूर्वेति लुकि मा भूत् ॥ =२

षिव॰
२

© Dharmarth Trust. Digitized By eGangotri

द्विगुरेकवचनमिति। वक्ष्यतीति वचनं बाहुलकात् कर्तरि ल्युट् सामान्येन
नपुंसकं द्विगुसमासः एकार्थवृत्तिपादको भवतीत्यर्थः। नहि वस्तुतो नैका
र्थस्यैकार्थ्यं संभवतीत्यतोऽतिदेशोऽयमित्याशयेनाह। एकवदिति। त
था च समाहारे यो द्विगुस्तदर्थ एकवत् स्यादित्यर्थः। स नपुंसकमिति परव
ल्लिंगमित्यस्यापवादः ॥=१

विशेषणमिति। विशिष्यते येन
तद्विशेषणं। कर्तुः करणत्व विव
क्षायां ल्युट्। तदाह भेदकमिति
व्यवर्तकमित्यर्थः। विशेषणविशे
ष्ययोः संबंधिकैकतया अन्यतरोपा
दानमात्रेण तत्सिद्धेः पदद्वयो
पादानं स्पष्टार्थमिति केयटः ॥=२

द्विगुरेकवचनं ॥२।४।१॥ द्विगर्वथः समाहारे एकवचनं स्यात् ॥ स नपुंसकम्
२।४।१७॥ समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् ॥ पञ्चानां गवां समाहारः।
पंचगवं ॥ विशेषणं विशेष्येण बहुलं ॥२।१।५७॥ भेदकं भेद्येन समाना
धिकरणेन बहुलं प्राग्वत् ॥ नीलमुत्पलं। नीलोत्पलं। बहुलग्रहणात्
क्वचिन्नित्यं। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः ॥ अपरस्यार्द्धे पश्चा
भावो वक्तव्यः ॥ अपरश्चासावर्द्धश्च। पश्चार्द्धः ॥ सन्महत्परमोत्तमोत्कृ
ष्टाः पूज्यमानैः ॥२।१।६१॥ सह समस्यंते ॥ सद्वैद्यः ॥ आन्महतः समा
नाधिकरणजातीययोः ॥६।३।४६॥ महावैयाकरणः। महांश्चासौ
प्रकारो महाजातीयः ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः ॥१।२।४२॥

एतच्च पश्चादि सूत्रे भाष्ये
स्थितम्=५

सन्महत्। गुणक्रियाशब्दैः
सदादीनां समासे पूर्वनिपात
नियमार्थमिदं सूत्रम्। महापा
पकमित्यादौ पापस्य महत्त्वेन
संशो पूजात्ये वेति बोध्य
म्=६

समानाधिकरणजातीययो
परतः महत्शब्दस्य आका
रोऽन्तादेशः स्यात्=२

तत्पुरुषाधिकारे पुनस्तत्पुरुषग्रहणमेकसंज्ञाधिकारात् कर्मधारयसंज्ञया तत्पुरुष
संज्ञाया बाधः स्यात् स माभूदित्येतदर्थमन्यथा तत्पुरुषे विहितसमासान्तस्य कर्मधारये
प्रवृत्तिर्न स्यादिति बोध्यम्। समानाधिकरणः समानाधिकरणपदपूर्वक इत्यस्य
र्थो व्याख्यानात् ॥=१

© Dharmarth Trust. Digitized By eGangotri

उपमानानीति। उपमीयते येन तदुपमानं उपपूर्वात् माङः करणे ल्युट् उपपूर्वकस्य माङः सादृश्यहेतुके परिच्छेदे रूढः येन वस्तुना सादृश्येन वस्त्वन्तरं परिच्छिद्यते तदुपमानमित्यर्थः समानो धर्मः सामान्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। उपमानोपमेययोः साधारणो धर्मः सामान्यं तद्विशिष्टवचनैरित्यर्थः नतु केवलं साधारणधर्मवचनैरिति। एतच्च वचनपदाल्लभ्यते पूर्वं येऽसामान्ये प्रयुक्ता तदपि द्रव्यपर्यवसायिनीति यथा भवन्ति इति बोध्यम् ॥ =१

लाक्षणिकमिति। अत एव सामानाधिकरण्यात् मृगीव चपलेति वा क्ये मृगचपलेति पुंवद्भावः उत्तरपदोपस्थापित श्यामत्वचपलत्वादि धा ... लाक्षणिकत्वेऽपि भूतपूर्वग... रकमेव सादृश्यं गम्यते व्याख्यानात्। ... त्योश्च क्यार्थबोधकत्वादुपमानपरत्वमवसेयम् ॥ =२

कौ॰ उ॰
४

ॐ उपमानानि सामान्यवचनैः २।१।५५ घन इव श्यामः ॥ घनश्यामः ॥ इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते ॥ पूर्वनिपातनियमार्थं सूत्रं ॥ वा॰ ॥ शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् ॥ वा॰ ॥ शाकप्रियः पार्थिवः ॥ शाकपार्थिवः ॥ देवपूजको ब्राह्मणः । देवब्राह्मणः ॥ मयूरव्यंसकादयश्च २।१।७२ एते निपात्यन्ते ॥ मयूरो व्यंसकः । मयूरव्यंसकः ॥ व्यंसको धूर्तः । उदक्च अवाक्च उच्चावचं । निश्चितं च प्रचितं च निश्चप्रचं । नास्ति किंचन यस्य सोऽकिंचनः ॥ नञ् २।२।६ सुपा सह प्राग्वत् ॥ नलोपो नञः ६।३।७३ नञो नस्य लोपः स्यात् उत्तरपदे परतः ॥ अब्राह्मणः ॥ तस्मान्नुडचि ६।३।७४ लुप्त

पूर्वनिपातेति। अन्यथा त्वञ्जकुञ्जवदनियमः स्यादिति भावः ॥ =३

मयूर इव व्यंसक इत्युपमानसमासापवादोऽयं चकारोऽवधारणार्थः तेनान्येन सह समासान्तरं वारयति ततश्च परमो मयूरव्यंसक इति वाक्यमेव न समासः ॥ मयूरव्यंसक छात्रव्यंसक काम्बोजमुण्ड यवनमुण्ड छन्दसि हस्तगृह्य पादगृह्य लाङ्गूलगृह्य पुनर्दाय ॥ =५

नञ् इह नलोपो नञ इति प्रोक्तत्वाद्धी नकारस्तत्फलं च नैकधेत्यत्र लोपः अव्ययेनञ्कनिपातानामित्यत्र पूर्वपदप्रकृतिस्वरार्थं ञकारोच्चारणमित्यन्ये। सुपा समस्यते इति उत्तरपदार्थप्रधानोऽयं समासः तथाहि आरोपितत्वं नञा द्योत्यते तथाच अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अर्थात् ब्राह्मणभिन्न इति पर्यवस्यति ॥ =२॥

प्रियश्चासावीश्वरः पार्थिवस्तस्येश्वर इत्यर्थः शाकप्रिय इति बहुव्रीहिस्तस्य पार्थिवशब्देन समासे पूर्वसमासीयोत्तरपदस्य प्रियशब्दस्य लोप एवं सर्वत्र शाकादिशब्दस्य शाकप्रियादौ लक्षणया तत्प्रयोगसमर्थनेऽपि मुख्यार्थे शाकप्रियपार्थिव इति इति प्रयोगनिरत्यर्थं सूत्रम् ॥ =४

वा॰=
उत्तरपदे किं घटो नास्ति=

श्या॰
४

© Dharmarth Trust. Digitized By eGangotri

नतु पृथ्वीवाचकः =२

नशब्देनेति नञा समासः । समासेतु अनेकधेति स्यादिति भावः । एवमेव नमेरु नारा चनान्तरीयकादयः सा धवः । =२

कुगतीति सूत्रे कुशब्दः कुत्सितार्थोऽव्ययमेव गृह्यते गत्यादिसाहचर्यात् । तेनाव्यय पूर्वपदप्रकृतिस्वरः ॥ =२ ॥

नकारान्तन्नञ उत्तरपदस्याजादेर्नुट् ॥ अनश्वः । नैकधेत्यादौ
तु नशब्देन सह सुप्सुपेति समासः ॥ कुगतिप्रादयः २।२।१८ एते समर्थे
न नित्यं समस्यन्ते ॥ कुत्सितः पुरुषः । कुपुरुषः ॥ ऊर्यादिच्विडाचश्च ॥
१।४।६१ ऊर्यादयश्च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः ॥
ऊरीकृत्य । ऊररीकृत्य । शुक्लीकृत्य । पटपटाकृत्य ॥ सुपुरुषः ।
॥ प्रादयो गताद्यर्थे प्रथमया । ० । प्रगतः आचार्यः । प्राचार्यः । अ
त्यादयः क्रान्ताद्यर्थे द्वितीयया । ० । अतिक्रान्तो मालामिति विग्रहे ।
एकविभक्ति चापूर्वनिपाते १।२।४४ । विग्रहे यन्नियतविभक्तिकं त
दुपसर्जनं न तु तस्य पूर्वनिपातः ॥ गोस्त्रियोरुपसर्जनस्य १।२।४८
उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः ॥

समर्थेनेति परिभाषयोपस्थितं समर्थपदं तृतीयया विपरिणम्यते इति भावः ॥

ऊरी ऊररी स्वीकारे =५

प्रादय इति । आदिशब्दे उभयत्र प्रकारे तेन दुराचारः पुरुषो दुःपुरुष इत्यादि सिद्धम् । प्रगत आचार्य इति अनेन गतार्थे वृत्तिं अस्वपदविग्रहेण नित्यसमासतां च दर्शयति एवं प्रगतः पितामहः प्रपितामहः प्रमातामह इत्यादि ॥ =६

च्विडाचौ कृभ्वस्तियोगे गतिसंज्ञौ ऊर्यादयोऽपि शब्दस्वाभाव्यात्तत्रैव प्रयुज्यन्ते प्रायेण सजातीयाः सहचरा भवन्तीति न्यायेनैषां तथा साहचर्यावगमात् तत्रापि आदिप्राप्तौ डुः शब्दे विरायान्येषां करोतिनैव योग इति व्यवस्था । मनो. ॥ =३

अत्यादय इति । आदिपदादभिमुखो गतो मुखमभिमुखः । उत्क्रान्तो वेलामुद्वेलः । प्रतिगतोऽक्षं प्रत्यक्ष इत्यादि सिद्धम् ॥ =७

विग्रह इति । अनुवर्त्यमानेन समासे पदेन विग्रहो लक्ष्यते इति भावः । नतु तस्येति अनन्तरोक्तः पूर्वनिपातोऽनेन न निषिध्यते किन्तु ह्रस्वार्थमिदं सूत्रमिति भावः । निष्क्रान्तः निष्क्रान्ते त्यादिक्रमेण निष्क्रान्तादिशब्दस्यानियतविभक्तिकत्वेऽपि कौशाम्बीशब्दस्य नियतलिंगतयोपसर्जनत्वात् । निष्कौशाम्बिरित्यग ह्रस्व इति बोध्यम् ॥ =३

© Dharmarth Trust. Digitized By eGangotri

अवादय इति आदिपदात् परिणद्धो वीरुधा परिवीरुत्। संनद्धो वर्मणा संवर्मेत्यादि ग्राह्यम्॥

पर्यादय इति आदिपदादुद्युक्तः संग्रामाय उत्संग्रामः। अध्ययनायेति तादर्थ्ये चतुर्थी गुरुकुलवासादिना परिग्लानोऽध्ययनार्थमित्यर्थः। निरादय इति आदिपदात् उत्क्रान्तः कूलादुत्कूलः निर्गतमङ्गुलिभ्यो निरङ्गुलमित्यादि ग्राह्यम्॥=

तत्तत्सूत्रे प्रथमार्थे सप्तमीवचनेन लब्धमर्थमाह तद्वाचकं पदमिति॥=

कौ: ५

स्यात्। अतिमालः॥ अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया॥ अवकोकिलः॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। ॥ परिग्लानोऽध्ययनाय। पर्यध्ययनः॥ निरादयः क्रान्ताद्यर्थे पञ्चम्या॥ निष्क्रान्तः कौशाम्ब्याः। निष्कौशाम्बिः॥ तत्रोपपदं सप्तमीस्थम्। ३।१।९२ सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात्॥ उपपदमतिङ् २।२।१९ उपपदं सुबन्तं समर्थेन नित्यं समस्यते अतिङन्तश्चायं समासः॥ कुंभं करोतीति। कुंभकारः। अतिङ् किं। मा भवान् भूत्। माङि लुङिति सप्तमीनिर्देशान्माङुपपदं॥ अतिङ्ग्रहणं ज्ञापयति। सुप्सुपेत्येतन्नेहानुवर्तत इति पूर्वसूत्रेऽपि गतिग्रहणं पृथक् कृत्वा तिङ्ग्रहणं। तत्रापकृष्यते। सुपे

तत्रोपपदमित्यधिकारः। तथा च। कर्मणीत्यादौ सप्तमी प्रथमार्थे सूत्रत्वात्॥ धातोरण् भवति कर्म चोपपदसंज्ञं भवतीत्येवं रीत्या तत्तत्सूत्रार्थः। अत्र सूत्रे सप्तमीपदं तदन्तपरं तत्स्थं तद्वाच्यमित्याह। सप्तम्यन्ते पदे इति॥=

समर्थेनेति तेनेह महान्तं कुम्भं करोतीत्यादौ नातिप्रसंगः। अतिङन्तश्चेति सुप्सुपेति तु अनुवर्तत एवेति भावः। कुम्भ अस् कृ अण् इति। अमिति तु नोक्तं कर्तृयोगे षष्ठीविधानात्॥=

इह कुम्भ अस् कार इत्यलौकिकप्रक्रियावाक्यम्।

अलौकिकमित्यस्य समासप्रवृत्तियोग्यं लोके प्रयोगानर्हमित्यर्थः॥=

सुप्सुपेत्यधिकारात् तिङन्तेन समासो न भविष्यति कृतमतिङ्ग्रहणेनेत्याशङ्क्यातिङ्ग्रहणस्य ज्ञापकतयैव सार्थक्यं दर्शयति अतिङ्ग्रहणमिति॥= २

पूर्वसूत्रेऽपीति तथा च तत्र योगं विभज्य कुप्रादयः सुबन्ताः सुबन्तेन सह समस्यन्ते गतिश्च सुबन्तोऽतिङन्तेन समस्यते इति व्याख्येयमित्यर्थः॥= २

शिव

© Dharmarth Trust. Digitized By eGangotri

तथा चेति । यद्वृ घ्रघ्र क्र इत्यागतत्पुरुषपदयोरेव लाभ स्तथापि गतयः विषयिणी
शाचां परिभाषा एकदेशानुमितन्यायेन इहापि ज्ञाप्यते इति भावः ॥
कारकांशे तु कर्तृकरणे कृतेति सूत्रस्य बहुलं ग्रहणं उक्तार्थे साधकमित्य
पि मनोरमायां स्थितं । प्राग्मिति कृदन्तात्स्वरस प्रत्यय सुबुत्पत्तेः पूर्वं समास
इत्यर्थः । प्रथमान्ते सुबन्तग्रहणेऽपि तु सुबन्तेर्तत एव तेन राजत = क्रीत्यादेरुपपदेन लो

कादिकार्यं सिध्यति ॥ =

कारकमुदाहरति । अश्वक्रीतीति । अश्वेन क्रीयते स्मेति वाक्ये कर्तृ
करणे कृतेति तृतीयासमासः । ततोऽनन्तरपदे सुबुत्पत्तेः प्रागेव
समासे क्रीतात्करणपूर्वादिति ङीष् । सुबन्तेन समासे तु टापाभा
व्यमिति क्रीताश्वदस्यादन्तत्वाभावात् । क्रीतादित्यादिना ङीष्
न स्यादित्युक्तम् प्राक् ॥ = २ ॥

तिङ्निवृत्त्यै तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः । व्याघ्री । अश्वक्रीती । कच्छपीत्यादि ॥ तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ५।४।८६ संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात् । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलं ॥ निर्गतमङ्गुलिभ्यो निरङ्गुलं ॥ अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ५।४।८७ एभ्यो रात्रेरच् स्याच्चकारात् संख्याव्ययादेः । अहर्ग्रहणं द्वन्द्वार्थम् ॥ रात्राह्नाहाः पुंसि २।४।२९ एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव ॥ अहश्च रात्रिश्च अहोरात्रः । सर्वरात्रः । पूर्वरात्रः । पुण्यरात्रः ॥ संख्यातरात्रः ॥ संख्यापूर्वं रात्रं क्लीबम् ॥ द्विरात्रं । अतिरात्रः । त्रिरात्रं ॥ राजाहःसखिभ्यष्टच् ५।४।९१ एतदन्तात्तत्पुरुषाट्टच् । परमराजः । कृष्णसखः ॥ आन्महतः समानाधिकरणजातीययोः । महाराजः ॥ प्रकारवचने जातीयर् ५।३।६९ महाप्रकारो महाजातीयः ॥

उपपदस्तमुदाहरति । कच्छपीति । कच्छे जलप्राये पिबतीति कच्छपी
सुपि स्थ इति योगविभागात् कः । इहापि व्याघ्रीवत् सुबुत्पत्तेः पूर्वं समा
सः । अत एव बहुलं सुपसुपा सुपा तिङा नाम्ना धातुनाथ तिङां तिङा सुबन्तेनेत्यादिना नाम्नैव समासो दर्शित इति स्मर्तव्यम् ॥ = २

तत्पुरुषप्रसंगात् तत्पुरुषासाधारणसमा
सान्तानाह । तत्पुरुषस्येति । तत्पुरुषादङ्गु
लेरिति वक्तव्ये समासान्तापेक्षया ऽवय
वषष्ठी निर्दिष्टेति बोध्यम् ॥ = २

द्व्यङ्गुलमिति । तद्धितार्थेति समासः द्विगो
र्नित्यमिति मात्रचो लोप इति वृत्तिकृत्
मनोरमायां तु द्वयसचो लुगिति स्थितम् ॥ = ४

अहोरात्र इति । जातिरप्राणिनामित्येकवद्भा
वः सन्नपुंसकमिति प्राप्ते तदाधित्वा परत्वात्
रात्राह्नाहा इति पुंस्त्वम् ॥ = ७

सर्वरात्र इति । सर्वरात्र इति । पूर्वकालैकसर्व
जरत्पुराणनवकेवलाः समानाधिकर
णेन २।१।४९ इति समासः । = ७

पूर्वं रात्रेः पूर्वरात्रः इति । पूर्वा
परा धरोत्तरमित्येकदेशि समासः ॥ ४

समासः = ४ = ४

रात्रिमतिक्रान्तः इत्यतिरात्रः =

द्वन्द्वार्थमिति । अहोरात्र इति । षष्ठी तत्पुरुषस्या
सम्भवादिति भावः । अहः एकदेशस्य प्रसङ्गाद्वपरत्र्या
रात्रिश्च तस्यां परापि रात्रौ अहर्व्याप्तिराप्तिवस्त्वं
ऽवयवी भूता मानुपरात्रिरित्येव तात्पर्य
र्थकेऽवयवावयविभावसम्बन्धः तत्पुरुषानभिधानात् अन्य तत्पुरुषस्याप्यसम्भवात् अहश्च रात्रिश्चेति
कर्मधारये एकदेशकल्पनया यथा कथंचित् सम्भवेऽपि हेमन्तशिशिरावहोरात्रे च छन्दसि
इति निर्देशात् द्वन्द्वविषय एव समासान्तदर्शितात् द्वन्द्वविषयमिदमित्यर्थः ॥ = ६

द्वयोरात्र्योः समाहारः
द्विरात्रम् । अतिक्रा
न्तो रात्रिम् । अतिरात्रः । = ४

परिभाषा फलं दर्शयन् गतिमुदाहरति । व्याघ्रीति । व्याजिघ्रतीति व्याघ्री
आतश्चोपसर्गे ॥ इति कः पाघ्राध्माधेट्दृशः शः इति शस्तु संज्ञायां न भ
वति व्याघ्रादिभिरिति निर्देशादिति वक्ष्यते व्याङोऽघ्रशब्दे
न गतिसमासः यदि घ्रशब्दस्य सुबन्तेन तामपेक्षेत तर्हि
सुबुत्पत्तेः संख्याद्यपेक्षेत ततश्च लिङ्गाद्यपेक्षायां टापाभा
व्यम् न तु ङीष् घ्रशब्दमात्रस्य जातित्वाभावात् ।
ततश्च घ्रेति नाममात्रे सेव समासेऽदन्तत्वात् जातिलक्षणे
ङीषिति स्थितम् ॥ = २

© Dharmarth Trust. Digitized By eGangotri

परवल्लिंगमि॥ इतरेतरयोगो द्वंद्वः गात्र... समाहारे द्वन्द्वः स नपुंसकमित्यपवादस्यावश्यमाणत्वात्
सूत्रे तत्पुरुषयोरिति न सप्तमी द्विवचनं तयोर्द्वन्द्वे तत्पुरुषे च यत्परपदं तद्वल्लिंगं पूर्वपदस्येति दिवृत्ते
त परपदस्य संबंधि शब्दत्वेन पूर्वपदादेपकत्वात् ततः मयूरीकुक्कुटावित्यत्र पूर्वपदे ईकार निवृत्ति
प्रसंगः। कुक्कुटमयूर्यौ अर्धपिप्पलीत्यादौ तु पूर्वपदे स्त्रीप्रत्ययः उत्पद्येत किन्तु षष्ठी द्विवचनं मित्याश
येनाह। परपदस्येवेति॥ =३

अष्टनः संख्यायामबहुव्रीह्यशीत्योः ६।३।४७ आत्स्यात्॥ द्वौ च दश च द्वादश
द्व्यधिका दश इति वा। द्वाविंशतिः। अष्टाविंशतिः। अबहुव्रीह्यशीत्योः किं। द्वि
त्राः। द्व्यशीतिः॥ परवल्लिंगं द्वन्द्वतत्पुरुषयोः २।४।२६ एतयोः परपदस्येव
लिंगं स्यात्॥ कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ अर्धपिप्पली॥
द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः॥ पंचकपालः पुरोडा
शः। प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलंकुमार्यै अलंकु
मारिः॥ अत एव ज्ञापकात्समासः॥ निष्कौशाम्बिः॥ अर्धर्चाः पुंसि च २।४।३१
अर्धर्चादयः पुंसि क्लीवे च स्युः॥ अर्धर्चः अर्धर्चं॥ एवं ध्वजतीर्थशरीर
मेहदेहयूपदेहांकुशकलशसूत्रपात्रादयः॥ सामान्ये नपुंसकं। मृदु
पचति। प्रातः कमनीयं॥६॥ इति तत्पुरुषः समासः। शुभम्॥

सभा राजामनुष्यपूर्वा २।४।२३ राजपर्यायपूर्वः अमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात्। इनसभं। ईश्वरसभं।
अमनुष्यशब्दो रूढ्या रक्षः पिशाचादीनाह। रक्षःसभं। पिशाचसभं॥ विभाषा सेनासुराच्छायाशालानिशानां २।४।२५
एतदन्तस्तत्पुरुषः क्लीबं वा। ब्राह्मणसेनं। ब्राह्मणसेना इत्यादि॥ अशाला च २।४।२४॥ संघातार्थीयसभान्तस्तत्पुरुषः
क्लीवं स्यात्॥ स्त्रीसभं। स्त्रीसंघात इत्यर्थः। अशाला किं धर्मसभा धर्मशालेत्यर्थः॥ = ग्रं.४ पंक्तिः॥
...यवसुरं। यवसुरा। कुड्यच्छायम्। कुड्यच्छाया। गोशालं। गोशाला।

कौ.टि.
६

गतिसमासपदं गतेः समासोऽयेनेति
पहुव्रीहिणा गतिसमासविधायकस्य
ग्रपरत्व कुगतिप्रादयः इति सूत्रस्य
तस्मिन् कुगतेत्यारभ्योदाहरणसम्भवा
त् प्रादयुदाहरति निष्कौशाम्बिरिति
=५

मृदुपचतीति क्रियाविशेषणत्वात्
द्वितीयान्तम्... तथा च कल
समानाधिकरणे द्वितीया...
वं सकलाविषयादेः कारक पूर्वकत्वा
ग्रहणं =१ ... षष्ठ्यामुपस्यैवेति तेने
षष्ठीयसेवेति। ... राजसभा। चन्द्र
वचनसंवेत्यर्थः ... गुप्तसभा।
... नि॥

... परत्वपर्युदासनञ्ज इति
तत्सिद्धमिति। तत्सादृश्यमभावश्च तद
न्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च
नञर्थाः षट्प्रकीर्तिताः। इत्युक्तेः
सादृश्यविरोधसहितमेदस्य प्रकृते
नञर्थत्वस्वीकारेण राजसभिशा
चानां च तथात्वादमनुष्यशब्देन
तेषामेव ग्रहणमन्यथा कामं सभ
मित्यपि स्यादित्याह॥ =
सभाशब्दस्य शालासंघातार्थक
त्वेन तदर्थे प्रवृत्तौ निषेधाभावेन
तत्र अशालेति पर्युदासः शालार्थ
भिन्नत्वार्थः॥ =
पंचकपाले पुरोडाशे = मी ना

अर्धर्चाद्य इति बहुवचनं गण
सूचनार्थं तदाह अर्धर्चाद
य इति = ४

सामान्ये नपुंसकमिति अनिय
तलिंगविषयकमिदं तेनादिप
चति प्रातरादिरिति पुंस्त्ववद् = २

शिवः

© Dharmarth Trust. Digitized By eGangotri

द्वितीयाश्रितेत्यादिनाऽस्य त्रिकस्य द्विगिश्यसमासो नोक्तः स शेषः प्रथमान्त इत्यर्थः ॥=

अनेकमिति । द्वन्द्वैकशेषयोरपि प्रथमान्तवद् घटितत्वात् ततो विशेषार्थमाह । अनेकमित्यादि कोष इति समर्थसूत्रमिति चानुवर्तते अनेकं समर्थं परस्परसाकांक्षं शेषपदप्रतिपाद्यं प्रथमान्तं सवन्नमन्यस्य पदस्यार्थे वर्त्तमानं सत् बहुव्रीहिरित्यर्थः ॥=

॥ शेषो बहुव्रीहिः ।२।२।२३। अधिकारोयं प्राग्द्वंद्वात् ॥ अनेकमन्यपदार्थे ।

२।२।२४ अनेकं प्रथमांतमन्यपदस्यार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः ।

सप्तमीविशेषणे बहुव्रीहौ । २।२।३५ सप्तम्यंतं विशेषणं च बहुव्रीहौ प्राक्

प्रयोज्यं ॥ हलदंतात्सप्तम्याः संज्ञायाम् ६।३।९ । हलंताददंताच्च सप्तम्या अ

लुक् स्यात् संज्ञायां गम्यमानायाम् ॥ त्वचिसारः । कंठेकालः । युधिष्ठिरः ।

वनेकशेरुकः । अरण्येतिलकः ॥ अमूर्द्धमस्तकात्स्वांगादकामे ६।३।१२।

मूर्द्धमस्तकभिन्नाद्धलंताददंताच्च सप्तम्या अलुक् स्यात् अकामे उत्तर

सप्तम्यन्तस्य तु कर्त्र्याद्यन्वयद्वारैव क्रियान्वया द्विशेषणत्वे सिद्धे सप्तमीग्रहणं वैयधिकरण्येऽप्यत्र समासं ज्ञापयति ॥=३

॥ देवदत्तः ॥

शेषो बहुव्रीहिः । शेष अनुक्ते विप्रयोगे कर्मणि घञ् अनुक्तः यस्य त्रिकस्य समासो नोक्तः स शेष इत्याहुः । एवं च प्रथमान्तं यस्मिन्नर्थे ऽव्ययीभावादिसंज्ञकः समासो न विहितः स शेष इत्यर्थः इति हरदत्तो व्याख्यानस्तु पदे शेषत्वहल्लभावे उन्मत्तगंगमित्यत्र परत्वाद् बहुव्रीहिः स्यादिति वकारात्ताच्चाव्ययीभाव इत्युन्मत्तगंगा । इत्यत्र पदे प्रसज्येत ॥=१

भिन्नं
विशेषणे विगतं अधिकरणं स्थानं यस्य सः विभिन्नाधिकरणः
व्यधिकरणः। विगतं अधिकरणं यस्य सः व्यधिकरणपदः ब
मुखकामोऽस्य= हुव्रीहिः। सप्तमी विशेषणे इति सूत्रे सप्तमीग्रहणज्ञापकात् =२

॥ उरसिलोमा। अकामे किं। मुखकामः। अमूर्द्धमस्तकात् किं। मूर्द्धशिखः। मस्तकशिखः =

को. १ पु. विशेषणपदं चा न प्राप्तम् एवं सति न्यायेन तदेति दिक् विशेषणपरं तत्प्राप्त तएवेति =२

मस्तकशिखः॥ अत एव ज्ञापकात् व्यधिकरणपदो बहुव्रीहिः॥ प्राप्तमुदकं कं=२

ग्रामं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना

स्थाली। वीतं वरो हरिः। वीरपुरुषको ग्रामः॥ प्रादिभ्यो धातुजस्य वाच्यो वा

चोत्तरपदलोपश्च॥ प्रादिभ्यः परं यत् धातुजं तदंतस्य पदांतरेण बहुव्रीहिः

वाचेति। इदन्तु वाचनिकम्॥

वाच्यः। वा च पूर्वपदघटितोत्तरपदलोपः॥ प्रपतितपर्णः। प्रपर्णः।

प्रपतितं पर्णं यस्मादिति वाक्ये पतित भागस्य तथोभूतस्य लोप एव मत्वर्थे ॥

नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः॥ अविद्यमानपुत्रोऽपुत्रः॥

नञोऽस्त्यर्थानामिति। नञः परेषामस्त्यर्थवाचिनां
पदान्तरेण बहुव्रीहिर्वाच्यः अस्त्यर्थवाचिनां तु वा
लोप इत्यर्थः॥ अस्त्यर्थानां किम्। अनुपनीतपुत्रकः।
नञः किम्। निर्विद्यमानपुत्रः॥ =

शिव.
७

© Dharmarth Trust. Digitized By eGangotri

भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिर्निपातनात् पञ्चम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात् परः ऊङोऽभावो यत्र ॥

तुल्येत्यादि भाषितः पुमान् अस्मिन्नित्यादि व्याख्यानादयमर्थो लभ्यते इति तृतीयादिषु भाषितपुंस्कमित्यत्रोपपादितं द्रोणमार्गः भाषितः पुमान्येन तद्भाषितपुंस्कमित्युच्येत तर्हि कुटीभार्यः द्रोणीभार्यः इत्यादावतिप्रसंगः स्यात् भवति हि कुटशब्दो घटे पुल्लिंगो गेहेतु स्त्रीलिंगः द्रोणशब्दस्तु परिमाणविशेषे पुल्लिंगो गवादन्यां तु स्त्रीलिंग इति ॥=

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।६।३।३४। उक्तपुंस्कादनूङ् भावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः ॥ गोस्त्रियोरिति ह्रस्वः ॥ चित्रगुः । रूपवद्भार्यः ॥ अनूङ् किं । वामोरूभार्यः । पूरण्यां तु ॥ अप्पूरणीप्रमाण्योः ।५।४।११६। पूरणार्थप्रत्ययान्तं यत्स्त्रीलिंगं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात् ॥ कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंचमा रात्रयः ॥ स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः ॥ पुंवद्भावनिषेधोऽप्प्रत्ययश्च प्रधानपूर

समानाधिकरणे किम् । कल्याण्याः माता कल्याणीमाता । स्त्रियां किम् । कल्याणी प्रधानं यस्य स कल्याणीप्रधानः ॥=३

चित्रा गावो यस्येति लौकिकविग्रहे ॥ चित्रा अस् गो अस् इत्यलौकिकविग्रहे । चित्रगुः ॥=४॥

पंचमीति । तस्य पूरणे इति डट् नान्तादसंख्यादेरिति डटो मडागमः । टिड्ढेति ङीप् ॥२

प्रमाणीति । करणे ल्युट् तदन्तस्य विशेष्यनिघ्नत्वात् स्त्रियां ङीप् ॥=२

रात्रय इति उद्भूतावयवभेदो ऽत्र समुदायोऽन्यपदार्थः ।=२

प्रधानपूरण्यामेवेति पुंवद्भावविधौ वार्त्तिके तथाऽभिधानात् कल्याणपञ्चमीकः पक्ष इति भाष्योदाहरणाच्च पुंवद्भावः समासान्तश्च तत्रैवेति भावः ॥=१

© Dharmarth Trust. Digitized By eGangotri

वाच्या चेति। अन्यपदार्थघटकतया समासवाच्येत्यर्थः। उद्भूतावयवभेदस्य रात्रि संमूहस्य प्रधानत्वेन यथा प्रथमाद्यारात्रयः समानाभिधेया तथा पञ्चम्यपीति रात्रिपदार्थस्यान्यपदार्थेऽनुप्रवेशात् प्राधान्यमिति भावः ॥=१

नद्यृतः तपरत्वं स्पष्टार्थं नद्युत्तरपदादिति नद्यन्तादिति तु नोक्तं कपत्ययेन सह समासे कृते बहुव्रीहेरनद्यन्तत्वात् उत्तरपदन्तु नद्यन्तं भवत्येव समासे ग्रन्तस्समासान्तः। इति पञ्चाश्रयणादिति बोध्यम् ॥=२

ण्यामेव। रात्रिः पूरणीवाच्या चेत्युक्तोदाहरणे मुख्या ॥ अन्यत्र तु ॥ नद्यृतश्च ५।४।१५३। नद्युत्तरपदाद् दंतोत्तरपदाच्च बहुव्रीहेः कप् स्यात् ॥

पुंवद्भावः ॥ केणः ।७।४।१३। केऽणो ह्रस्वः स्यात्। इति प्राप्ते न कपि। ७।४।१४। कपि परे ह्रस्वो न स्यात् ॥ कल्याणपंचमीकः पक्षः। अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधाना ॥ बहुकर्तृकः। अप्रियादिषु किं। कल्याणीप्रियः ॥ प्रिया। मनोज्ञा। सुभगा। कल्याणी। दुर्भगा। भक्तिः। सचिवा। स्वसा। कांता। क्षांता। समा। चपला। दुहिता। वामा। अबला। तनया ॥ सामान्ये नपुंसकं ॥ दृढं भक्तिर्यस्य स दृढभक्तिः ॥

के ण इत्यत्र कस्य प्रत्ययस्यैव व्याख्यानात् तेन राकेत्यादौ न ह्रस्वः ॥=३

सामान्य इति। अ पाद्यर्थमात्र निरूपितपरत्वेन लिङ्गविशेषविवक्षाभावे इति भावः। तथा च तद्विवक्षायां दृढा भक्तिरित्यादि सिद्ध्यर्थं प्रियादिषु तस्याः पाठः ॥=२

कौ० पु० ८

8

श्रीव० ८

© Dharmarth Trust. Digitized By eGangotri

॥ ति विंशतेर्डिति ६।४।१४२ । विंशतेर्भस्य टेर्लोपो डिति ॥ आसन्नविंशाः । विंशतेरासन्ना इत्यर्थः । अदूरविंशाः । अधिकविंशाः ॥ द्वौ वा त्रयो वा द्वित्राः ॥ ६ ॥ दिङ्नामान्यन्तराले । २।२।२६ । दिशो नामान्यन्तराले वाच्ये प्राग्वत् । दक्षिणस्याः पूर्वस्याश्च दिशो अन्तरालं दक्षिणपूर्वा ॥ =

एतायते इत्यादि कर्तुः क्यङ् सलोपश्चेति क्यङि पुंवद्भावे कृते एतस्याः तयोरकृत्सार्वधातुकयोरिति दीर्घः । दर्शनीयमानीति मन इति णिनिः नान्तत्वात् ङीप् ॥ =३

स्त्रीत्वविवक्षायां । हृद्या भक्तिः ॥ क्यङ्मानिनोश्च । ६।३।३६ । एतयोः

परतः पुंवत् ॥ एनीयेव आचरतीति एतायते । श्येनीव आचरती

ति । श्येतायते । दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः ॥ न

पाचिकाभार्य इति । पचतीति पाचिका ण्वुल् । युवोरिति अकादेशः टापि प्रत्ययस्थादिति इत्वं । =४

कोपधायाः । ६।३।३७ । कोपधायाः स्त्रियाः न पुंवत् । पाचिकाभार्यः ।

मद्रिकेवाचरतीति आत्मानं मद्रिकामिव मन्यते । आत्ममाने खश्चेति णिनिः ॥

रसिकाभार्यः । मद्रिकायते । मद्रिकामानिनी ॥ कोपधप्रतिषेधे

रसिकाभार्य इति । रसोऽस्त्यस्या इति रसिका । अत इनि ठनाविति ठन् । =५ मद्रिकायते इति । क्यङ्मानिनोश्चेति पुंवत्त्वप्राप्तिः । मद्रेषु भवा मद्रिका मद्रवृज्योः कन् सति तु पुंवद्भावे इत्वं न श्रूयेतेति भावः । =३

तद्धितवुग्रहणं कर्तव्यं । नेह । पाकाभार्यो यस्य सः पाकभार्यः ।

दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोऽयमिति भाषितपुंस्कत्वमस्ति ॥ =१

अनयोः

संज्ञापूरण्योश्च । ६।३।३८ । न पुंवत् । दत्ताभार्यः । पंचमीभार्यः ।

तद्धितवुग्ग्रहणमिति । द्वन्द्वान्ते श्रूयमाणः प्रत्येकं संबध्यते तद्धितग्रहणं वुग्ग्रहणं चेत्यर्थः । पाकाभार्य इति । अर्भक पृथुक पाका वयसीति कप्रत्ययान्ता गुणादिषु निपातितः । नवायं तद्धितस्य ककारो नापि वुञः । वयसि प्रथमे ङीपं बाधित्वा अजादित्वाट्टाप् ॥ =२

© Dharmarth Trust. Digitized By eGangotri

व्युत्पत्त्येन षष्ठीति सप्तम्यावेव मेवेत्याह शयेन ग्राचष्टे बहुव्रीहेरिति ।
स्वाङ्गं च अद्रवं मूर्तिमदित्यादियुक्तलक्षणम् । षचः षित्त्वं ङीष
र्थं सदुदाहरति जलजाक्षीति । =२

दीर्घसक्थ्यनीयसास =

कौ. ठु

२

स्थूलानि अक्षीणि ग्रन्थीनि पर्वाङ्कुराणि यस्याः सा

१

व्युत्पत्त्येन षष्ठी

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ।५।४।११३। स्वाङ्गवाचिसक्थ्यक्ष्यन्ता
दबहुव्रीहेः षच् ॥ दीर्घसक्थः । जलजाक्षी । स्वाङ्गात्किं । दीर्घसक्थि शक
टं ॥ स्थूलाक्षा वेणुयष्टिः ॥ अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच् ॥ द्वित्रि

आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ =

भ्यां ष मूर्ध्नः ।५।४।११५॥ द्विमूर्धः । त्रिमूर्धः ॥ अन्तर्बहिर्भ्यां च लोम्नः ॥
५।४।११७। आभ्यां लोम्नोऽप् बहुव्रीहौ । अन्तर्लोमः । बहिर्लोमः ॥
पादस्य लोपोऽहस्त्यादिभ्यः ।५।४।१३८॥ हस्त्यादिवर्जितादुपमानात्परस्य
पादस्य लोपः स्यात् बहुव्रीहौ ॥ व्याघ्रस्येव पादावस्य व्याघ्रपाद् । अश्वेद

श्री = अयं यदि समासान्तो न स्यात् तदाऽहस्त्यादिभ्यः परस्येति
निर्देशेन हेत्वादेः परस्येति परिभाषया पादशब्दस्यादेरा
कारलोपः स्यात् । =१

॥ स्थानिर्दिष्टेण अयं समासान्तः । =१

शिव
९

© Dharmarth Trust. Digitized By eGangotri

स्त्यादिभ्यः किं । हस्तिपादः । कुसूलपादः ॥ संख्यासुपूर्वस्य ५।४।१४० । पादस्य
लोपः स्यात्समासांतो बहुव्रीहौ ॥ द्विपात् । सुपात् ॥ उद्विभ्यां काकुदस्य ५।४।१४८
लोपः स्यात् । उत्काकुत् । काकुदं तालु । विकाकुत् ॥ पूर्णाद्विभाषा । ५।४।१४९
पूर्णकाकुत् । पूर्णकाकुदः ॥ सुहृद्दुर्हृदौ मित्रामित्रयोः ५।४।१५० सुदुर्भ्यां
हृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रं । दुर्हृदमित्रः ॥ अन्यत्र । सुहृदयः ।
दुर्हृदयः । उरःप्रभृतिभ्यः कप् ५।४।१५१ । उरःप्रभृत्यंताद्बहुव्रीहेः कप्स्या
त् । व्यूढं विशालमुरो यस्य स व्यूढोरस्कः ॥ कस्कादिषु च ॥ एष्विण उत्तरस्य
विसर्गस्य षो न्यस्य तु स इति सः । व्यूढोरस्कः । प्रियं सर्पिर्यस्य स प्रियसर्पिष्कः ॥

सोपदादाविति विसर्जनीयस्य सः = २

इणः ष इति विसर्गस्य षत्वम् ॥ = १

© Dharmarth Trust. Digitized By eGangotri

अनुक्तसमासान्तादिति ॥ समासान्तापेक्षयैव शेष इत्याशयः ॥ परे तु नैवेह कवपेक्षया शेषत्वं हलं नापि समासान्तमात्रापेक्षया किन्तु अन्तरं यो बहुव्रीहि अधिकार उक्तः शेषो बहुव्रीहिरिति तदपेक्षयैव शेषो ग्राह्य इत्याहुः । प्राचेन्दु ॥ १ ॥

शेषाधिकारस्थात् किं । उपबहवः । तं ज्ञादिना शेषशब्दोऽर्थी दयपरः ॥ = १ ॥

शेषाद्विभाषा ५।४।१५४ अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुव्रीहेः कप् वा ॥ महायशाः । महायशस्कः । अनुक्तेत्यादि किं व्याघ्रपात् ॥ वन्दिते भ्रातुः ।५।४।१५७। पूजार्थभ्रात्रन्तात्कप् । प्रशस्तो भ्राताऽस्य प्रशस्तभ्राता । सुभ्राता । वन्दिते किं । मूर्खभ्रातृकः ॥ निष्ठा २।२।३६। निष्ठान्तं बहुव्रीहौ प्राक्प्रयोज्यम् ॥ कृतकृत्यः । युक्तयोगः ॥ इति बहुव्रीहिः ॥ छ ॥

अभिवादनस्तु निरूपो भयार्थक वन्दिधातुनो भयसाधारणपूजा लक्ष्यते इत्याशयेनाह । पूजितेऽर्थे यो भ्रातृ शब्द इति ॥ = २

को.उ.
१०

10

कृतकृत्ययोः क्रियाशब्दत्वाद नियमप्राप्ते वचनम् ॥ = ५ ॥

चार्थे द्वन्द्वः ॥ २।२।२९॥ अनेकं सुबन्तं चार्थे वर्त्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । समुच्चये उदाहरणमाह । तत्रेश्वरं गुरुं च भजस्वेति ॥ परस्परनिरपेक्षस्य अनेकस्य एकस्मि

अनेकमन्यपदार्थे इत्यतोऽनेकमित्यनुवर्त्तते सुपामन्त्रित- इत्यस्मात् सुबिति पि चार्था इति चशब्दद्योत्या इत्यर्थः ॥ = ६

परस्परनिरपेक्षस्येति एकस्य क्रियान्वयोत्तरमेव परस्यापि त्वाया तदन्वय इति । न तयोः परस्पराकांक्षा ॥ = १

एकस्मिन्निति भजनादावित्यर्थः एकधर्मावच्छिन्ने इत्यर्थः ॥ = १

शिव.
१०

© Dharmarth Trust. Digitized By eGangotri

इति भिन्न =

असामर्थ्यादिति । एकार्थीभावाभावा दित्यर्थः = २

आनुषंगिकत्वमनुद्देश्यत्वमन्यतरस्य अप्राधान्यं च तद्धि संबंधि क्रियाया आवश्यकर्तव्यत्वरूपं तथा च समभिव्याहृतक्रियादिगतमानुषंगिकत्वं यत्र तन्मन्वाचयश्च चकारार्थः = २

अनुद्भूतावयवभेदः समूहः समाहार इत्यर्थः = ३

न्वयः समुच्चयः । भिक्षामट गां चानयेति । अन्यतरस्यानुषंगिकत्वेना
न्वयोऽन्वाचयः । अनयोरसामर्थ्यात्समासो न । धवखदिरौ छिन्धीति ।
मिलितानामन्वय इतरेतरयोगः । संज्ञापरिभाषमिति समूहः समाहा
रः ॥ राजदन्तादिषु परं २।२।३१ । एषु पूर्वप्रयोगार्हं परं स्यात् ॥ दन्तानां
राजा राजदन्तः ॥ धर्मादिष्वनियमः ॥ अर्थधर्मौ धर्मार्थौ ॥ दंपती ।
जंपती । जायापती ॥ जायाया जंभावो दंभावश्च वा निपात्यते । आकृ
तिगणोऽयं ॥ द्वन्द्वे घि २।२।३२ ॥ द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिहरौ ॥ अजा
द्यदन्तं । २।२।३३ । इदं द्वन्द्वे पूर्वं स्यात् ॥ ईशकृष्णौ ॥ अल्पाच्तरम् २।२।३४ ।

मिलितानामिति परस्परापेक्षाणां मुद्भूतावयवभेदकसमूहरूपाणामित्यर्थः । अन्वयश्च इत्यस्यैकधर्माविच्छिन्नेनान्वय इत्यर्थः = ३

राजदन्तादिष्विति । इदं च सर्वसमासविषयं षष्ठीसमासकर्मधारयद्वन्द्वसमासनिबन्धनानां गणे पाठात् = ४

धर्मादिष्विति । द्वन्द्वविषयमेतत् । तेन राजदन्तादावुक्तगणे = ५

जायापती इति ॥ अन्यहित ते ऽपि पत्युर्न पूर्वनिपातः राजदन्तादिगणे पाठात् इति बोध्य हरिश्च हरश्च = २ म = ३

द्वन्द्वे घि सर्वेषामेव प्रथमाप्रदिष्टत्वेनोपसर्जनत्वाविशेषादनियमे प्राप्ते वचनमारम्भः = २

© Dharmarth Trust. Digitized By eGangotri

द्वन्द्वे घीत्यादिभ्यः पञ्चभ्योऽभ्यर्हितमित्यस्य परत्वात् सर्वापवादत्वं तेन वासुदेवार्जुना वित्यत्रार्जुनस्याद्यदन्तत्वे घित्वे च न पूर्वनिपातः । एवमन्यत्रापि बोध्यम् ॥=३

ऋतूनामानुपूर्व्यं प्रादुर्भावकृतं नक्षत्राणामुदयकृतमिति बोध्यम्=१

कौ॰उ॰ २२

शावकेशावौ । ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण । हेमन्तशिशिरवसन्ताः । कृत्तिकारोहिण्यौ । समाक्षराणां किं । ग्रीष्मवसन्तौ । लघ्वक्षरं पूर्वं । कुशकाशं । अभ्यर्हितं च । तापसपर्वतौ । वर्णानामानुपूर्व्येण । ब्राह्मणक्षत्रियविट्शूद्राः । भ्रातुर्ज्यायसः । युधिष्ठिरार्जुनौ ॥ पितामात्रा ॥ मात्रासहोक्तौ पितावाशिष्यते । पितरौ मातापितरौ ॥ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । २।४।२ ॥ एषां द्वन्द्व एकवत् ॥ पाणिपादं । मार्दङ्गिकपाणविकं ॥ रथिकाश्वारोहम् ॥ जातिरप्राणिनां २।४।६ दी प्राणिवर्जितानां जातिवाचिनां द्वन्द्व एकवत् । धानाशष्कुलि । प्राणिनां तु ।

